नक्तं चतुर्थयामार्द्धम्। कुजे दिवा षष्ठयामार्द्धं नक्तं सप्तमयामार्द्धम्। बुधे दिवा तृतीय यामार्द्धं नक्तं सप्तमयामार्द्धम्॥ गुरौ दिवा सप्तमयामार्द्धं नक्तं पञ्चमयामार्द्धम्। शुक्रे दिवा चतुर्थयामार्द्धं नक्तं तृतीययामार्द्धम्। शनौ दिवा प्रथमाष्टमयामार्द्धं नक्तं तदेव। इति दीपिका॥

कालशाकं, क्ली, (कालं कृष्णं शाकम्।) स्वनामख्यातशाकम्। नरचा इति हिन्दी भाषा। तत्पर्य्यायः। नाड़िकम् २ आढ्यशाकम् ३ कालकम् ४। अस्य गुणाः। सारकत्वम्। रुचिवायुबलकारित्वम्। कफशोथरक्तपित्तनाशित्वम्। मेध्यत्वम्। हिमत्वञ्च। इति भावप्रकाशः॥ तिक्तपूतिका। कुलत्थशाकं इति केचित्। अस्य गुणाः। कटुत्वम्। अग्निदीपनत्वम्। गुरुत्वम्। शोथनाशित्वञ्च। इति राजवल्लभः॥ (यथा च वाभटे सूत्रस्थाने। ६ अध्याये।
"वर्षाभ्वी कालशाकञ्च सक्षारं कटुतिक्तकम्।
दीपनं भेदनं हन्ति गरशोफकफानिलान्"॥)

कालशालिः, पुं, (कालः कृष्णः शालिः उत्कृष्टधान्यविशेषः।) कृष्णशालिः। इति राजनिर्घण्टः॥

कालशेयं, क्ली, (कलश्यां भवम्। कलशी+ढक्।) कालसेयम्। घोलम्। इत्यमरटीकायां भरतः॥

कालसंरोधः, पुं, (कालस्य संरोधः।) चिरकालावस्थानम्। इति मिताक्षरा॥ यथा।
"न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः"। इति याज्ञवल्क्यः॥

कालसर्पः, पुं, (कालः कृष्णः सर्पः।) कृष्णसर्पः। तत्पर्य्यायः। अलगर्द्दः २ महाविषः ३। इति त्रिकाण्डशेषः॥ (यथा काशीखण्डे १०० अध्याये।
"स दष्टः कालसर्पेण स दष्टो मृत्युना स्फुटम्।
स मुष्टस्तत्र दिवसे विश्वेशो यत्र नेक्षितः"॥)

कालसारं, क्ली, (कालः सारः प्रधानं यस्य।) पीतचन्दनम्। इति भावप्रकाशः॥ (कालीयकशब्देऽस्य गुणादयो बोद्धव्याः॥)

कालसारः, पुं, (कालः सारः प्रधानं यस्य।) स्वनामख्यातहरिणः। तत्पर्य्यायः। कृष्णसारः २। इति शब्दरत्नावली॥

कालसूत्रं, क्ली, (कालस्य यमस्य बन्धनहेतुकायाः सूत्रमिव।) नरकविशेषः। इत्यमरः।१।८।२॥ तत्तु कुलालचक्रसूत्रच्छेदनरूपम्। इति मनुः॥ (यथा मार्कण्डेये १४। ८६।
"कालसूत्रे तथाच्छेदमनेकाश्चैव यातनाः।
प्राप्य निष्कृतिमेतस्मात् न वेद्मि कश्चमेष्यति"॥)

कालसेयं, क्ली, (कलश्यां भवम्। कलशी+ढक्।) घोलम्। इत्यमरः।२।९।५३॥

कालस्कन्धः, पुं, (कालः कृष्णः स्कन्धो यस्य।) तमालवृक्षः। तिन्दुकवृक्षः। जीवकवृक्षः। इति मेदिनी॥ दूयखदिरः। उदुम्बरः। इति राजनिर्घण्टः॥ (अस्य व्यवहारो यथा,—सुश्रुते सूत्रस्थाने। ३८ अध्याये सालसारादिवर्गे॥
"सालसाराजकर्णखदिरकदरकालस्कन्धक्रमुकभूर्जमेषशृङ्गीत्यादिषु"॥)

काला, स्त्री, (कालो वर्णोऽस्त्यस्य अर्श आदिभ्य अच् टाप् च। अत्र वर्णस्याविवक्षायां जानपदेति न ङीष्। अर्श आद्यजन्तात् न ङीष् इत्यर्थः।) नीलिनी। कृष्णत्रिवृता। कृष्णजीरकः। इत्यमरः। २।४।९४॥ मञ्जिष्ठा इति मेदिनी॥ कुलिकवृक्षः। कालियाकड़ा इति भाषा। इति रत्नमाला॥ अश्वगन्धावृक्षः। इति राजनिर्घण्टः॥ पाटलावृक्षः। इति भावप्रकाशः॥ (दक्षकन्याविशेषः। सा तु कश्यपपत्नी। यथा महाभारते १। सम्भवपर्व्वणि ६५।१२।
"अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा"॥)

कालागुरु, क्ली, (कालं कृष्णं अगुरु।) कृष्णागुरु। इत्यमरः।२।६।१२७॥ (यथा रघुः ४।८१।
"चकम्पे तीर्णलौहित्ये तस्मिन् प्राग्ज्योतिषेश्वरः।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः"॥
कृष्णागुरुशब्देऽस्य पर्य्यायः गुणाश्च ज्ञेयाः॥)

कालाग्निः, पुं, (कालः सर्व्वसंहारकः अग्निः। प्रलयाग्निः। यथा महाभारते १।५४।२५।
"ब्रह्मदण्डं महाघोरं कालाग्निसमतेजसम्।
नाशयिष्यामि माऽत्र त्वं भयं कार्षीः कथञ्चन"॥
तदधिष्ठातृरुद्रदेवस्य प्रियत्वात् पञ्चमुखरुद्राक्षोऽपि कालाग्निनाम्नाख्यायते।) पञ्चमुखरुद्राक्षः। यथा स्कान्दे।
"पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात्।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात्"॥
इति तिथ्यादितत्त्वम्॥

कालाग्निरुद्रः, पुं, (कालः संहारकः अग्निः सम्वर्त्ताग्निरित्यर्थः। तस्याधिष्ठाता रुद्रः। कालाग्निरिव रुद्रो वा।) संहारकारिरुद्रः। यथा। कालाग्निरुद्र ऋषिरित्यादि वैदिकसन्ध्यायां रुद्रोपस्थानम्॥ *॥ तद्विवरणं यथा,—
शक्र उवाच।
"भगवंस्तव वाक्यानां न तृप्तिर्भवते मम।
कालाग्निपार्थिवं मानं श्रोतुमिच्छामि तत्त्वतः"॥
भगवानुवाच।
"न हि पार्थिवद्वीपेषु मेरुपृष्ठेऽपि वासव!।
भोगाह्लादकरा नृणां तथा पातालवासिषु॥
येषु नः कालरुद्रस्य नानास्त्रीशतसंकुला।
विचित्रहर्म्म्यविन्यासा कुतस्ते मेरुपृष्ठतः॥
सा एव कालरुद्रस्य तनुरूपेण संस्थिता।
सा पराशिवभावेन परमापददायिका॥
तस्या यद्दुःसहं तेजो ब्रह्मादीनां क्षयं करम्।
तं विद्धि कालरुद्रेति सौम्यरूपं सदाशिवम्॥
कालाग्निभुवनं लक्षं योजनानां प्रमाणतः।
अर्द्धमेकश्चतस्रस्य पादाः पादेन वासव!॥
सिंहरूपा महाघोरा महानका महाबलाः।
कालाग्निरुद्ररूपो यो बहुरूपसमावृतः॥
अनन्तपद्मरूपश्च धातारः कारणेश्वरः।
दारुणाग्निश्च रुद्रश्च यमहन्ता क्षमात्मकः॥
लोहितः क्रूरतेजात्मा घनो वह्निर्बलाहकः।
विद्युत्श्वसनशीघ्रश्च प्रसन्नः शान्तसौम्यदृक्॥
सर्व्वज्ञो विविधो बुद्धो द्युतिमान् दीप्तिसुप्रभः।
एते रुद्रा महात्मानः कालिकाग्निविचेष्टिताः॥
संहरन्ति समस्तेदं ब्रह्माद्यं सचराचरम्।
कालाग्निभुवनेशोऽयं बहुकोटिभिरावृतः॥
तस्याः पुरस्य विस्तारं शतकोटिसुवर्त्तुला।
देवगन्धर्व्वसिद्धानां तत्र भोगाः सुदुर्लभाः॥
पूर्व्वोत्तरपरा पङ्क्तिर्याम्योत्तरस्थिता परा।
अनलानिलपरा च नैर्ऋतेशानगापरा॥
एतेषां मध्यतो राजन् कालरुद्रस्तु शोभने।
पद्माकारैः पुरैः सर्व्वं कटकं तस्य संस्थितम्॥
समन्ताद्वेष्टितवनं प्राकाराट्टालगोपुरैः।
वज्रेन्द्रनीलवैदूर्य्यैः प्राकारैः सर्व्वतोऽन्वितम्॥
कालाग्निनरकान्ते तु पुरं कालस्य संस्थितम्।
पञ्चाशल्लक्षविस्तारं समन्तात् परिवर्त्तुलम्॥
जाम्बूनदमयैर्हेमैः खचितं रत्नधातुभिः॥
प्रमदाजनसंजुष्टं नानावर्णसमावृतम्॥
कामोन्मत्तप्रमत्तस्य तद्भाति जनसंकुलम्।
कालस्य भुवनं दिव्यं वृत्ताकारं मनोहरम्॥
वेष्टितं हेमप्राकारैर्योजनायुतमुच्छ्रितम्।
प्राकारावहिदग्धान्ते अन्तरं योजनायुतम्॥
अग्निज्वालैश्च निविडैर्भयदैः किंशुकप्रभैः।
हरितालनिभा ज्वाला सिन्दूरगैरिकाप्रभा॥
अत उर्द्धं प्रजज्वाल वातोद्धूताग्निभास्वरा।
वीचितरङ्गकल्लोलज्वालामालाकुलाम्बरा॥
प्रवृत्तास्ताः प्रमाणेन योजनद्वयकोटयः।
अष्टाणवतिलक्षाणि ज्वाला ऊर्द्धन्ततः शिखा॥
वज्रभूता सदा तप्ता तस्य तेजोनियामिका।
चत्वारि कोटिमानेन कारणेन तु स्थापिता॥
तस्यार्द्धेन भवेत् किञ्चित् कोट्यश्चत्वारि वासव!।
एवं कालाग्निरुद्रस्य माहात्म्यं कीर्त्तितं मया॥
श्रवणात् सर्व्वपापानि शाम्यन्ति कालजान्यपि"॥
इत्याद्ये देवीपुराणे कालाग्निरुद्रपुरकथनम्॥
(कृष्णयजुर्व्वेदगतोपनिषद्विशेषः। यथा, मुक्तिकोपनिषदि।
"कालाग्निरुद्रमैत्रेयी सुबालक्षुरिमन्त्रिका"॥
वटिकौषधविशेषः। यथा,—
"सूतकान्ताभ्रलौहानां भस्ममाक्षिकगन्धकम्।
भूधराख्ये पुटे पश्चाद्दिनकं तद्विपाचयेत्॥
दशमांशं विषं योज्यं माषमात्रञ्च भक्षयेत्।
रसः कालाग्निरुद्रोऽयं दशाहेन विसर्पनुत्"॥
कालाग्निरुद्रोरसः॥
इति रसेन्द्रसारसंग्रहे वीसर्पाधिकारे॥*॥)

कालाञ्जनी, स्त्री, (अज्यतेऽनया। अन्ज्+करणे ल्युट्+ङीप्। काली अञ्जनी ततः पुंवद्भावः।) क्षुपविशेषः। कालिकार्पासिकिनी इति ख्याता। तत्पर्य्यायः। अञ्जनी २ रेचनी ३ शिलाञ्जनी ४ नीलाञ्जनी ५ कृष्णाभा ६ काली ७ कृष्णाञ्जनी ८। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। अमघ्नत्वम्। क्रमिशोधनत्वम्। अपानावर्त्तशमनत्वम्। जाठरामयनाशित्वञ्च। इति राजनिर्घण्टः॥

कालानुनादी, [न्] पुं, (कल एव कालः अव्यक्तमधुर-